॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## गुरू पादुका स्तोत्र

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# गुरू पादुका स्तोत्र

अनन्तसं(व्)सार समुद्रतार नौकायिताभ्यां(ङ्) गुरुभक्तिदाभ्याम् ।
वैराग्यसाम्राज्यदपूजनाभ्यां(न्) नमो नमः(श्) श्रीगुरुपादुकाभ्याम् ॥ 1 ॥

कवित्ववाराशिनिशाकराभ्यां(न्) दौर्भाग्यदावां(म्) बुदमालिकाभ्याम् ।
दूरिकृतानम्र विपत्ततिभ्यां(न्) नमो नमः(श्) श्रीगुरुपादुकाभ्याम् ॥ 2 ॥

नता ययोः(श्) श्रीपतितां(म्) समीयुः कदाचिदप्याशु दरिद्रवर्याः ।
मूकाश्च वाचस्पतितां(म्) हि ताभ्यां(न्) नमो नमः(श्) श्रीगुरुपादुकाभ्याम् ॥ 3 ॥

नालीकनीकाश पदाहृताभ्यां(न्) नानाविमोहादि निवारिकाभ्याम् ।
नमज्जनाभीष्टततिप्रदाभ्यां(न्) नमो नमः(श्) श्रीगुरुपादुकाभ्याम् ॥ 4 ॥

नृपालि मौलिव्रजरत्नकान्ति सरिद्विराजत् झषकन्यकाभ्याम् ।
नृपत्वदाभ्यां नतलोकपङ्क्तेः(न्) नमो नमः(श्) श्रीगुरुपादुकाभ्याम् ॥ 5 ॥

पापान्धकारार्क परम्पराभ्यां(न्) तापत्रयाहीन्द्र खगेश्वराभ्याम् ।
जाड्याब्धि सं(व्)शोषण वाडवाभ्यां(न्) नमो नमः(श्) श्रीगुरुपादुकाभ्याम् ॥ 6 ॥

शमादिषट्क प्रदवैभवाभ्यां(म्) समाधिदान व्रतदीक्षिताभ्याम् ।
रमाधवान्घ्रिस्थिरभक्तिदाभ्यां(न्) नमो नमः(श्) श्रीगुरुपादुकाभ्याम् ॥ 7 ॥

स्वार्चापराणाम् अखिलेष्टदाभ्यां(म्) स्वाहासहायाक्षधुरन्धराभ्याम् ।
स्वान्ताच्छभावप्रदपूजनाभ्यां(न्) नमो नमः(श्) श्रीगुरुपादुकाभ्याम् ॥ 8 ॥

कामादिसर्प व्रजगारुडाभ्यां(म्) विवेकवैराग्य निधिप्रदाभ्याम् ।
बोधप्रदाभ्यां(न्) द्रुतमोक्षदाभ्यां(न्) नमो नमः(श्) श्रीगुरुपादुकाभ्याम् ॥ 9 ॥